विषय- संस्कृत, बी॰ ए॰ स्नातक (प्रतिष्ठा)
प्रथम वर्ष, प्रथम पत्र
कुमारसम्भव - पञ्चमसर्ग
पद्यांश व्याख्या

डॉ॰ ओम प्रकाश आर्य
महाराजा कॉलेज, आरा
दिनांक - 16|10|2020

इति ध्रुवेच्छामनुशासती सुताम्
शशाक मेना न नियन्तुमुद्यमात् ।
क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत् ॥5॥

अन्वय-
इति अनुशासती मेना ध्रुवेच्छां सुतां उद्यमात् नियन्तुं न शशाक, ईप्सितार्थ-स्थिरनिश्चयं मनो निम्नाभिमुखं पयश्च कः प्रतीपयेत् ।

पदार्थ-
इति = इस तरह से, अनुशासती = उपदेश देकर, मेना = पार्वती की माता, ध्रुवेच्छाम् = निश्चय इच्छावाली, सुताम् = पुत्री को, उद्यमात् = उद्यम से, नियन्तुम् = रोकने में, न शशाक = समर्थ नहीं हुई। ईप्सितार्थस्थिर निश्चयम् = अभिलषित फल की प्राप्ति के लिए दृढ़ संकल्प, मनः = मन वाले, च = और, निम्नाभिमुखम् = नीचे की ओर बहते हुए, पयः = जल को, कः = कौन, प्रतीपयेत् = समर्थ हो सकता है।

संस्कृत व्याख्या - (मल्लिनाथ)
इत्येवमनुशासत्युपदिशन्ती मेना

ध्रुवेच्छां स्थिरव्यवसायां पार्वती मध्यमातु- द्योगात्तपसो लक्षणा नियन्तुं न शशाक समर्था नाभूत् । तथाहि - ईप्सितार्थे दृष्टार्थे स्थिर- निश्चयं मनो निम्नाभिमुखं पयश्च कः प्रतीपयेत् प्रतिकूलयेत् । प्रतिनिवर्तयेदित्यर्थः। निम्नप्रवणं इवेष्टार्थाभिनिविष्टं मनो दुर्वारमिति भावः ॥5॥

भावार्थ -

इस प्रकार उपदेश देकर भी मेनका अपनी दृढ़ संकल्प वाली पुत्री पार्वती को तपस्या करने के उद्यम से रोकने में समर्थ न हो सकी। अभीष्ट वस्तु को प्राप्त करने के लिए दृढ़ संकल्प मन वाले तथा नीचे की ओर प्रवाहित होते हुए जल के प्रवाह को रोकने में भला कौन समर्थ हो सकता है?

व्याकरण -

अनुशासती - अनुशास्तीति अनुशासती, ध्रुवेच्छाम् - ध्रुवा इच्छा यस्याः सा, तां ध्रुवेच्छाम्, ईप्सितार्थस्थिरनिश्चयम् - ईप्सितार्थो अ ईप्सितश्चासौ अर्थश्चेति ईप्सितार्थः, स्थिरो निश्चयो यस्य तत् स्थिरनिश्चयम्, ईप्सितार्थे स्थिरनिश्चयम् इति ईप्सितार्थ- स्थिरनिश्चयं तत्, निम्नाभिमुखम् - निम्ने अभिमुखं निम्नाभिमुखम् । 'इच्छा काङ्क्षा, स्पृहेहा, तृड् वाञ्छा लिप्सा मनोरथः' इति 'पयः कीलालममृतं जीवनं भुवनं वनम्' इति चामरः। अत्र दीपकानुप्राणितोऽ- र्थान्तरन्यासालंकारः॥इति॥